"वपनं नैव नारीणां नानुव्रज्याजपादिकम् ।
न गोष्ठे शयनं तासां न च दध्यान्मृगाजिनम् ॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
एवमेव तु नारीणां मुण्डमुण्डनमादिशेत् ॥"
इति गोवधप्रकरणे विवेचितम् ।
"प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।
पूर्ब्बं गृहीत्वा सङ्कल्पं प्रमादान्नाचरेद्यदि ।
जीवन् भवति चण्डालो मृतः श्वा चाभि-
जायते ॥"
इति प्रायश्चित्तविवेकधृतवचनम् ॥
देवलः ।
"सर्व्वभूतभयं व्याधिः प्रमादो गुरुशासनम् ।
अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः ॥"
भर्त्तुरनुज्ञया स्त्रीणां व्रतकरणे न दोषः । कामं भर्त्तुरनुज्ञया व्रतोपवासनियमेज्यादीनामभ्यासः स्त्रीधर्म्म इति संवत्सरप्रदीपधृतशङ्खवचनात् ।
अत्र कथाश्रवणमाह देवीपुराणम् ।
"तद्ध्यानं तज्जपः स्नानं तत्कथाश्रवणादिकम् ।
उपवासकृतो ह्येते गुणाः प्रोक्ता मनीषिभिः ॥"
अथ व्रतप्रतिष्ठाविधिः ।
श्रीभगवानुवाच ।
"गोपथारामसेतूनां मठसंक्रमवेश्मनाम् ।
नियमव्रतलक्ष्याणां प्रतिष्ठां शृणु सत्तम ॥
ब्राह्मेण विधिना वह्निं समाधाय विचक्षणः ।
शिलां पूर्णघटं कांस्यं सम्भवे स्थापयेद्बुधः ॥
ब्रह्मन् सर्व्वं समासाद्य श्रपयेद्यवमयं चरुम् ।
क्षीरेण कपिलायास्तु तद्विष्णोरिति साधकः ॥
प्रणवेनाभिघार्य्याथ दर्व्व्या संघट्टयेत् ततः ।
साधयित्वावतार्य्याथ तद्विष्णोरिति होमयेत् ॥
व्याहृत्या चैव गायत्र्या तद्विप्रासेति होमयेत् ।
विश्वतश्चक्षुरित्युक्त्वा वेदाद्यैर्होमयेत्तथा ॥
ॐ भूरग्नये स्वाहा । ॐ सूर्य्याय स्वाहा । ॐ प्रजापतये स्वाहा । ॐ अन्तरीक्षाय स्वाहा । ॐ द्यौः स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ पृथिव्यै स्वाहा । ॐ महाराजाय स्वाहा । ॐ सोमं राजानमिति जुहुयात् । ॐ लोकपालेभ्यः स्वाहा । स्वस्वमन्त्रैर्जुहुयाद्ग्रहेभ्यश्च ।
एवं हुत्वा चरोर्भागं दद्यात् दशदिशां बलिम् ।
ततः पलाशसमिधा हुनेदष्टोत्तरं शतम् ॥
आज्यन्तु जुहुयात् पश्चादेभिर्मन्त्रैर्द्विजोत्तमः ।
ततः पुरुषसूक्तेन मन्त्रैराज्यन्तु होमयेत् ॥
इरावतीति जुहुयात् तिलान् घृतपरिप्लुतान् ।
हुत्वा च ब्रह्मविष्णीशदेवानामनुयायिनम् ॥
ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुनः ।
पर्व्वतानां नदीनाञ्च समुद्राणां तथैव च ॥
हुत्वा व्याहृतिभिर्दद्यात् स्रुचा पूर्णाहुतित्रयम् ।
वौषडन्तेन मन्त्रेण वैष्णवेन सुरोत्तम ॥
पञ्चगव्यञ्च संप्राश्य दद्याद्दाचार्य्यदक्षिणाम् ।
तिलपात्रं हेमयुक्तं सवस्त्रं गामलङ्कृताम् ।
प्रीयतां भगवान् विष्णुरित्युत्सृजेद्व्रतं नरः ॥*॥
आरामं कारयेद्यस्तु नन्दने स चिरं वसेत् ।
मठप्रदानात् स्वर्लोकं प्राप्नोति पुरुषः सदा ॥
सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः ।
प्रपादानाद्वारुणस्य लोकमाप्नोत्यसंशयम् ॥
संक्रमाणान्तु यः कर्त्ता दुर्गतिं तरते नरः ।
स्वर्गलोके च निवसेत् इष्टकासेतुकृत्तथा ॥
गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।
नियमव्रतकृद्याति विष्णुलोकं नरोत्तमः ॥
लक्षकृत् स्वर्गमाप्नोति सर्व्वपापविवर्ज्जितः ।
अनेन विधिना मर्त्यः संपूर्णं फलमाप्नुयात् ॥*॥
इयं प्रतिष्ठा सामान्या सर्व्वसाधारणा च ।
कर्त्तव्या देशिकेन्द्रैस्तु प्रतिष्ठा यत्र विद्यते ॥
इति संक्षेपतः प्रोक्तः समुदायविधिस्तव ।
सर्व्वेषामेव वर्णानां सर्व्वकामफलप्रदः ॥
सर्व्वेष्वेतेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः ।
फलार्थिभिस्त्वप्रतिष्ठं यस्मान्निष्फलमुच्यते ॥"
इति हयशीर्षे समुदायप्रतिष्ठापटलः ॥ *॥
ब्राह्मेण वैदिकेन स्वगृह्योक्तविधिनेति यावत् । शिलेति उदूखलोपलक्षणम् । कांस्यं अग्निप्रणयनार्थम् । कांस्येन अग्निप्रणयनमाह । गृह्यासंग्रहे ।
"शुभं पात्रन्तु कांस्यं स्यात्तेनाग्निं प्रणयेद्-
बुधः ॥
तस्याभावे शरावेण नवेनाभिमुखञ्च तम् ।
सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः ।
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु ॥"
एवञ्चाग्निप्रणयनानन्तरं सर्व्वत इत्यस्य पाठो युक्तः । प्रणीत इति मन्त्रलिङ्गात् । अन्यथा स्थापनानन्तरं एतद्विधानं व्यर्थं स्यात् ॥ * ॥
अत्र च पाकाङ्गत्वात् साहसनामानमग्निमाह गृह्यासंग्रहः ।
"प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः ।
पूर्णाहुत्यां मृड़ो नाम शान्तिके वरदस्तथा ।
आहूय चैव होतव्यं यत्र यो विहितोऽनलः ॥"
प्रायश्चित्ते होमकर्म्मवैगुण्यसमाधानार्थं प्रायश्चित्तात्मकमहाव्याहृतिहोमादौ । तथा च छन्दोगपरिशिष्टम् ।
"यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुतिः ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधिः
स्मृतः ॥"
अत्र त्रिविकल्प इत्यभिधानात् सामगानां भवदेवभट्टोक्तशाट्यायनहोमो निष्प्रामाणिकः ।
अत्रासुकाम्ये इहागच्छागच्छ इत्युच्चार्य्य यवाभावे व्रीह्यादिभिरपि होमः ।
"हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादीन् सर्व्वाभावे विवर्ज्जयेत् ॥
यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥"
इति छन्दोगपरिशिष्टात् ॥
तत्र गोभिलेन अथ हविर्निर्व्वपति व्रीहीन् यवान् वा कांस्ये चरुस्थाल्यां वा असुष्मै त्वा जुष्टं निर्व्वपामीति देवतानामोद्देशः । सकृद्-
यजुषा द्विस्तूष्णीमित्यनेन निर्व्वापक्रमाभिधानात् सामगेन तन्मात्रं कर्त्तव्यम् । अत्र च विष्णवे त्वा जुष्टं निर्व्वपामीत्यनेन यजुषा चरुं इत्यभिधानात् हवनीयनिर्व्वापणादिचरुनिष्पत्तिः कर्त्तव्या । तत्र छन्दोगपरिशिष्टम् ।
"देवतासंख्यया ग्राह्या निर्व्वापाश्च पृथक् पृथक् ।
तूष्णीं द्विरेव गृह्णीयाद्धोमश्चापि पृथक् पृथक् ॥"
अत्र देवतासंख्यया पृथक् पृथक् निर्व्वापः । अनुनिर्व्वापस्तन्त्रेणैव । होमोऽपि पृथक् पृथगेवेति । आलस्यादिपुरुषदोषेण गृहीतलक्षणेनापि मन्त्रेण निर्व्वापादिकं समाचरन्ति याज्ञिकाः ।
"घाते न्यूने तथा च्छिन्ने साम्नाय्ये मान्त्रिके
तथा ।
यज्ञे मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः ॥"
इत्युक्तेः । मान्त्रिके मन्त्रसाध्ये अवघातादौ न्यूने तत्काले मन्त्रपाठाभावे मन्त्राः प्रयोक्तव्याः । कपिलाया अभावे अन्यधेनोरपि घृतेन सप्रणवतद्विष्णोरित्यनेनाभिघार्य्य दर्व्व्या दक्षिणावर्त्तेन संमिश्रयेत् । दर्व्वी च प्रादेशप्रमाणा द्व्यङ्गुलविस्तारा ग्राह्या ।
"इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् ।
वृत्तं चाग्रे च पृथ्व्यग्रमवदानक्रियाक्षमम् ॥
एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे ।
दर्व्वी द्व्यङ्गुलपृथ्व्यग्रा तुरीयोनञ्च मेक्षणम् ॥"
इति छन्दोगपरिशिष्टात् ।
इध्मार्द्धप्रमाणं प्रादेशमात्रम् । प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम् । इति छन्दोगपरिशिष्टोक्तेः । अथेत्यनेन स्वगृह्योक्तशेषकर्म्मसमापनानन्तरं प्रकृतहोमः । अत्र बहुदेवताकचरुहोमादुपघातहोमः ।
"चरौ तु बहुदैवत्ये होमः स्यादुपघातवत् ।"
इति छन्दोगपरिशिष्टधृतवचनात् ॥
उपघातलक्षणमाह गृह्यासंग्रहः ।
"पाणिना मेक्षणेनाथ स्रुवेणैव तु यद्धविः ।
हूयते चानुपस्तीर्य्य उपघातः स उच्यते ॥
यद्युपघातं जुहुयाच्चरावाज्यं समापयेत् ।
मेक्षणेन तु होतव्यं नाज्यभागो न स्विष्टकृत् ॥"
अनुपस्तीर्य्य इत्यनेन स्रुचि यच्चतुरावर्त्तं पञ्चावर्त्तं वा घृतोपस्तरणादिकं तदत्र नास्ति तेन मेक्षणादिना सकृत् गृहीत्वा होतव्यम् ॥ * ॥
प्रकृतहोमात् प्राक् वह्निपूजनमाह मार्कण्डेयपुराणम् ।
"पूजयेच्च ततो वह्निं दद्याच्चाप्याहुतीः क्रमात् ।"
तत इति वह्निनामकरणध्यानानन्तरम् ।
होमानुष्ठाने स्मृतिः ।
"मन्त्रेणोङ्कारपूर्व्वेण स्वाहान्तेन विचक्षणः ।
स्वाहावसाने जुहुयाद्ध्यायन् वै मन्त्रदेवताम् ॥"
ततस्तद्विष्णोरितिमन्त्रेण चरुणा होमयेत् । एवं व्याहृत्या प्रत्येकं भूरित्यादिना । गायत्र्या सावित्र्या । तद्विप्रासेति तद्विप्रासो विपन्यवो जागृवांस इत्यादिना । विश्वत इति विश्वत-